- Title – भावप्रकाश
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 12/24, 176 - 187 Pg
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – पुराणा विरसास्तु मानतथागुणकारिणः
- End – घोटकेवीतितुरंगतुरंगाश्च
- Colophon-
- Illustrations -
- Source -
- Subject - आयुर्वेद
- Revisor -
- Author -
- Remarks- अपूर्ण

6.11.19

पुराणा विरसा रूक्षा न तथा गुणकारिणः पुराणा वर्षषट्‌कयाऽपरिस्थिताः यवादयो नवाः स्व
स्वादु गुरु श्लेष्मकरे स्मृते ॥ नन्तु वर्षोषितं पथ्यं यतो लघुतरं हितं ॥ वर्षोषितं सर्वधान्यं
गौरवं परिमुंचति ॥ न तु त्यजति वीर्यं स्वं क्रमान्मुंचत्यतः परं ॥ एतेषु यवगोधूमतिलमाषा
न वा हिताः ॥ पथ्याशिनो तु पुराणा हिताः ॥ पुराणयवगोधूमक्षौद्रजांगलस्ल्यभुगिति
वसंते वाग्भटेनोक्तत्वात् ॥ इति श्रीभावप्रकाशे धान्यवर्गः ॥ अथ शाकवर्गः ॥ तत्र शाक
निरूपणं ॥ पत्रं पुष्पं फलं नालं कंदं संस्वेदजं तथा ॥ शाकं षड्विधमुद्दिष्टं गुरुविद्याद्यथो
त्तरं ॥ अथ शाकानां गुणाः ॥ प्रायः शाकानि सर्वाणि विष्टंभीनि गुरूणि च ॥ रूक्षाणि व
हुवर्चांसि सृष्टविण्मारुतानि च ॥ शाकं भिनत्ति वपुरस्थि निहंति नेत्रं वर्णं विनाशयति
रक्तमथापि शुक्रं ॥ प्रज्ञाक्षयं च कुरुते पलितं च नूनं हंति स्मृतिं गतिमिति प्रवदंति तज्ज्ञाः
शाकेषु सर्वेषु वसंति रोगास्ते हेतवो देहविनाशनाय ॥ तस्माद्बुधः शाकविवर्जनं तु कु
र्वीत तथाम्लेषु स एव दोषः ॥ एतानि शाकनिंदकानि वचनानि सामान्यानि ॥ अथ पत्रशा

स्यान्त्रेति
हिताः ४
३ ×

- Title – भावप्रकाश
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 12/24, 176 - 187 pg
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – पुराणा विरसाः रूक्षा न तथा गुणकारिणः
- End – छोटिकं...
- Colophon-
- Illustrations -
- Source -
- Subject - आयुर्वेद
- Revisor -
- Author -
- Remarks- अपूर्ण

6.11.19

उराणा विरसा रूक्षा न तथा गुणकारिणः पुराणा वर्षमध्याद् उपरि स्थिताः यवादयो नवाः स्व
स्वादु गुरुः श्लेष्मकराः स्मृताः ॥ नन्तु वर्षोषितं पथ्यं यतो लघुतरं हितं ॥ वर्षोषितं सर्वधान्यं
गौरवं परिमुंचति ॥ न तु त्यजति वीर्यं स्वं क्रमान्मुंचत्यतः परं ॥ एतेषु यवगोधूमतिलमाषा
न वा हिताः ॥ पथ्याशिनो तु पुराणा हिताः ॥ पुराणयवगोधूमक्षौद्रजांगलपस्त्वभुगिति
वसंते वाग्भटेनोक्तत्वात् ॥ इति श्रीभावप्रकाशे धान्यवर्गः ॥ अथ शाकवर्गः ॥ तत्र शाक
निरूपणं ॥ पत्रं पुष्पं फलं नालं कंदं संस्वेदजं तथा ॥ शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथो
त्तरं ॥ अथ शाकानां गुणाः ॥ प्रायः शाकानि सर्वाणि विष्टंभीनि गुरूणि च ॥ रूक्षाणि ब
हुवर्चांसि सृष्टविण्मारुतानि च ॥ शाकं भिनत्ति वपुरस्थि निहंति नेत्रं वर्णं विनाशयति
रक्तमथापि शुक्रं ॥ प्रज्ञाक्षयं च कुरुते पलितं च नूनं हंति स्मृतिं गतिमिति प्रवदंति तज्ज्ञाः
शाकेषु सर्वेषु वसंति रोगास्ते हेतवो देहविनाशनाय ॥ तस्माद् बुधा शाकविवर्जनं तु कु
र्युस्तथाम्लेषु स एव दोषः ॥ एतानि शाकानिंदकानि वचनानि सामान्यानि ॥ अथ पत्र

स्यान्नुति हिताः ४
३ ×

१७६ केषुविशिष्टानिवचनानिगतश्चापिवास्तूकंस्यनामगुणाः॥वास्तूकंवस्तुकंचस्यात्क्षार
पत्रंचशाकराट्॥तदेवतुबृहत्पत्रंरक्तंस्यात्गौडवास्तुकं॥प्रायशोयवमध्येस्याद्यवशाकमतः
स्मृतं॥वास्तूकद्वितयंस्वादुक्षारंपाकेकटूदितं॥दीपनंपाचनंरुच्यंलघुशुक्रबलप्रदं॥सर
ष्टीरुक्स्वपित्तार्शःकृमिदोषत्रयापहं॥अथपोई॥पोतकुपोदिकासातुमालवामृतवल्लरी
पोतकीशीतलास्निग्धाश्लेष्मलावातपित्तनुत्॥अ[illegible]ष्ठाअपिच्छिलानिद्राशुक्रदारक्तपित्त का ५
जित्॥बलदारुचिकृत्पथ्याबृंहणीतृप्तिकारिणी॥श्वेतमरसा॥लोहितमरसा॥नवडाइति
च॥मारीषोवाष्पकोमार्षःश्वेतोरक्तश्चसस्मृतः॥मारिषोमधुरःशीतोविष्टंभीपित्तनुद्गुरुः॥
वातश्लेष्मकरोरक्तपित्तनुद्विषमाग्निजित्॥रक्तमार्षोगुरुर्नातिसक्षारोमधुरःसरः॥श्ले
ष्मलःकटुकःपाकेस्वल्पदोषउदीरितः॥अथचवराइ॥अल्पमरसाइतिच॥तंडुलीयो
मेघनादःकांडेरस्तंडुलेरकः॥भंडीरस्तंडुलीबीजोविषघ्नश्चाल्पमारिषः॥तंडुलीयो १७६

लघुःशीतोष्णःपित्तकफास्रजित्॥रुष्टमूत्रमलंहृद्योदीपनोविषनाशकः॥अथवव
राइभेदः॥जलतंदुलीयंशाकविकंचटमिति प्रसिद्धं॥पानीयतंदुलीयोयस्तलंकंचटमु
दाहृतम्॥कंचटंतिक्तकंरक्तपित्तानिलहरंलघु॥अथपलांक्यां॥पलंक्यावास्तुकाका
राछुरिकाचीरितछदा॥पलंक्यावातलाशीताश्लेष्मलाभेदिनीगुरुः॥विष्टंभिनीमद
श्वासपित्तरक्तकफापहा॥अथनाडिका॥कालशाकमिति॥नाडिकंकालिशाकंच
श्रद्धशाकंचकालकं॥कालशाकंसरंरुच्यंवातकृत्कफशोथहृत्॥वल्यंरुचिकरं
मेध्यंरक्तपित्तहरंहिमं॥अथपट्टुआ॥पट्टशाकस्तुनाडीकोनाडीशाकसमस्ततः
नाडीकोरक्तपित्तघ्नोविष्टंभीवातकोपनः॥अथकरेंबी॥कलंबीशतपर्वीचकथ्य
तेतद्गुणाः॥अथ॥कलंबीस्तन्यदाप्रोक्तंमधुराशुक्रकारिणी॥अथलोनी॥वृह
ल्लोनी॥लोनालोनीचकथ्यतावृहल्लोनीतुघोटिका॥लोनीरूक्षासतताकटुर्वात

श्लेष्महरी पटुः ॥ अम्लोग्नीदीपनी चाम्ला मेहाग्निविषनाशिनी ॥ चोरिकाम्ला मरा
चोष्मा वातहृत्कफपित्तकृत् ॥ लवणोच ब्रणगुल्मघ्नी श्वासकासभ्रमेहृत् ॥ शोथे लो
चनरोगे च हिता तस्ते हरा हता ॥ अथ चांगेरी ॥ अंम्बिलोनाइतिच ॥ चांगेरी चुक्रि
कादंतशठांबष्टाम्ललोनिका ॥ अश्मंतकस्तु सकरी पिशाली चाम्लपत्रकः ॥ चांगेरी
दीपनी रुच्या रूक्षोष्णा कफवातनुत् ॥ पित्तलाम्ला ग्रहण्यर्शःकुष्ठातीसारनाशिनी
॥ अथ चूक ॥ चुक्रिका स्यात्पंचशाम्ला रोचिनी शतवेधिनी ॥ अथ चुंचु नाडीवतत ॥ चिं
चा वंचुश्चंचुकी च दीर्घपत्रा सतिक्तका ॥ चंचुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा
धातुपुष्टिकरी बल्या मेध्या पिच्छिलिका तथा ॥ अथ हिंगोविका ॥ कुरकुरइतिलोके ले
ब्राह्मी शंखधरा चारी ब्राह्मी च हिलमोचिका शोथं कुष्ठं कफं पित्तं हरते हिलमोचि
का ॥ अथ सितरंगारी ॥ शितिवारः शितिवनः स्वस्तिकः सुनिषण्णकः ॥ श्रीवारकः
सूचिपत्रः पर्णकः कुक्कुटः शिखी ॥ चांगेरीसदृशः पत्रैश्चतुर्दल इतीरितः ॥ शाको
ष्णो वल्लतरस्स्वादी वातघ्नी कफपित्तकृत् रुच्या लघुतरा पाके रत्नाकेना
तिरोचनी ६४

अथ गूमा ॥ द्रोणपुष्पी दलं स्वादु रूक्षं गुरु च पित्तकृत् ४

जन्तान्विते दे शोथ तद्यत्रीति निवीच्यते ॥ हन्ति वह्निं हिमोग्राही मोहदोषत्रयापहः ॥ अविद
ही लघुः स्वादुः कषायो रूक्षपत्रकः ॥ वध्यारुज्योज्वरश्वासमेहकुष्ठमप्रणुत् ॥ अथ
गुराइपत्र ॥ पावनं लघु रूक्षोष्णं पत्रं मूलकजं नवं ॥ स्नेहसिद्धं त्रिदोषघ्नमसिद्धं कफपि
त्तकृत् ॥ भेदनं कामलाशोथमेहज्वरहरे कटु ॥ अथ यवनमाहनि ॥ यवानी शाकमाग्नेयं
रुच्यं वातकफप्रणुत् ॥ अथ चकोड ॥ दद्रुघ्नपत्रं दोषघ्नमम्लं वातकफापहं ॥ कंडूका
सकृमिश्वासदद्रुकुष्ठप्रणुत् लघुः ॥ अथ सेंहुड ॥ सेहुंडस्य दलं तीक्ष्णं दीपनं रोच
नं हरेत् ॥ आध्मानष्ठीलिकागुल्मशूलदोषोदराणि च ॥ अथ धनपापर ॥ पर्पटो ह
कफ ति पित्तास्रज्वरतृष्णाभ्रमा[illegible]न् ॥ संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ॥ अथ
गोभी ॥ गोजिह्वा कुष्ठमेहास्रकृच्छ्रज्वरहरी लघुः ॥ अथ पटोलपत्रं ॥ पटोलपत्रं पि
त्तघ्नं दीपनं पाचनं लघुः ॥ स्निग्धं वृष्यं तथोष्णं च ज्वरकासकृमिप्रणुत् ॥ अथ गुडू[illegible]ची

पत्रं॥ गुडूचीपत्रमाग्नेयं सर्वज्वरहरं लघु॥ कषायं कटु तिक्तं च स्वादु पाके रसायनम्॥
बल्यमुष्णं च संग्राहि हन्यात् दोषत्रयं त्वसौ॥ दाहप्रमेहवातास्रकामलाकुष्ठपांडुताः
अथ कसौंजी॥ कासमर्दोरिमर्दश्च कासारिः कर्कशस्तथा॥ कासमर्ददलं वृष्यं रुच्यं
कासविषास्रनुत्॥ मधुरं कफवातघ्नं पाचनं कंठशोधनं॥ विशेषतः कासहरं पित्त
घ्नं ग्राहकं लघुः॥ अथ चनक॥ रुच्यं चनकशाकं स्यात् दुर्जरं कफवातकृत्॥ अम्लं वि
ष्टंभजननं पित्तनुद्दंतशोथहृत्॥ अथ केराव॥ कलाय शाकं भेदि स्यात् लघु तिक्तं
घ त्रिदोषजित्॥ अथ सरिसों॥ कटुकं सार्षपं शाकं बहुमूत्रमलं गुरु॥ अम्लपाके वि
दाहि स्यात् रूक्षोष्णं त्रिदोषकृत्॥ सतारलवणैस्तीक्ष्णैः स्वादु शाकं न निंदितं॥ अथ पु
श्रा ष्पकानि॥ तत्रागस्तिपुष्पस्य गुणाः॥ अगस्तिकुसुमं शीतं चातुर्थ्यकनिवारणं॥
नक्तांध्यनाशनं तिक्तं कषायं कटु पाकि च॥ पीनसश्लेष्मपित्तघ्नं वातघ्नं मुनिभि

मतम्॥ अथकदलीपुष्पं॥ कदल्याःकुसुमेस्निग्धंमधुरंतुवरंगुरु॥ वातपित्तहरं
शीतंरक्तपित्तक्षयप्रणुत्॥ अथसोभांजनपुष्पं॥ शिग्रोःपुष्पंतुकटुकंतीक्ष्णोष्णंस्ना
युशोथनुत्॥ क्रिमिहृत्कफवातघ्नंविद्रधिप्लीहगुल्मजित्॥ मधुशिग्रोस्त्वाद्विहितं
रक्तपित्तप्रसादनं॥ अथशाल्मलिपुष्पं॥ शाल्मलीपुष्पशाकंतुघृतसैंधवसाधितं
प्रदरंनाशयत्येवदुःसाध्यंचनसंशयः॥ रसेपाकेचमधुरंकषायंशीतलंलघु॥ कफ
पित्तास्रजिद्ग्राहिवातलंचप्रकीर्तितं॥ अथफलशाकानि॥ तत्रकूष्मांडस्यनामगुणाः
कूष्मांडंस्यात्पुष्पफलंपीतपुष्पंबृहत्फलं॥ कूष्मांडंबृंहणंवृष्यंगुरुपित्तास्रवातनु
त्॥ वातपित्तापहंशीतंमध्यमंकफकारकं॥ वृद्धंनातिहिमंस्वादुसक्षारंदीपनंलघु
वस्तिशुद्धिकरंचेतोरोगहृत्सर्वदोषजित्॥ अथकोहंडी॥ कूष्मांडीतुभृशंलघ्वी
कर्कारुरपिकीर्तिता॥ कर्कारुर्ग्राहिणीशीतारक्तपित्तहरागुरुः॥ पक्वातिक्ताग्नि।

जननीसत्तारा कफवातनुत् ॥ अथ लंबलौका ॥ गृहलौका ॥ अलाबूः कथिता तुंबी द्विधा दीर्घा च वर्तुला ॥ मिष्टतुंबीफलं हृद्यं पित्तश्लेष्मापहं गुरु ॥ वृष्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनं ॥ अथ तित्तलौकी ॥ इक्ष्वाकुः कटुतुंबी स्यात्सा तु बीच महाव ला ॥ कटुतुंबी हिमा हृद्या पित्तकासविषापहा ॥ तिक्ता कटुर्विपाके च पित्तवातज्वरांतकृत् ॥ अथ ककडी ॥ एर्वारुः कर्कटी प्रोक्ता कथ्यंते तद्गुणा अथ ॥ कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ॥ रुच्या पित्तहरा सामा पक्वा तृष्णाग्निपित्तकृत् ॥ अथ चिचिंडा ॥ चिचिंडः श्वेतराजिः स्यात्सुदीर्घो गृहकूलकः ॥ चिचिंडो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ॥ शोषणोऽतिहितः किंचिद्गुणैर्न्यूनः पटोलतः ॥ अथ करेला ॥ करेल्ली ॥ कारवेल्लं कठिल्लं स्यात्कारवेल्ली ततो लघुः ॥ कारवेल्लं हिमं भेदि लघु तिक्तमवातलं ॥ ज्वरपित्तकफास्रघ्नं पांडुमेहकृमीन्हरेत् ॥ तद्गुणा कारवेल्ली सा

हृद्रोगघ्नी दीपनी लघुः ॥ अथ वंध्याकर्कोटकी ॥ महाकोशातकी प्रोक्ता हस्तिघोषा महाफला ॥
धामार्गवो घोरकश्च हस्तिपर्णश्च सस्मृतः ॥ महाकोशातकी स्निग्धा सरा पित्तानि-
लापहा ॥ अथ तोरई ॥ धामार्गवः पीतपुष्पो जालिनी कृतवेधनः ॥ राजकोशात-
की चेति तथोक्ता राजिमत्फला ॥ राजकोशातकी शीता मधुरा कफवातला ॥ पि-
त्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत् ॥ अथ परवर ॥ पटोलः कुलकस्तिक्तः
पांडुकः कर्कशच्छदः ॥ पटोलं पाचनं हृद्यं वृष्यं लघ्वग्निदीपनं ॥ स्निग्धोष्णं हंति
कासास्रज्वरदोषत्रयकृमीन् ॥ पटोलस्य भवेन्मूलं विरेचनकरं सुखात् ॥
नालं श्लेष्महरं पत्रं पित्तहारि फलं पुनः ॥ दोषत्रयहरं प्रोक्तं तद्वत्तिक्तपटोलिका
अथ कंदूरी ॥ बिंबी रक्तफला तुंडी तुंडकेरी च बिंबिका ॥ ओष्ठोपमफला प्रोक्ता पी-
लुपर्णी च कथ्यते ॥ बिंबीफलं स्वादु शीतं गुरु पित्तास्रवातजित् ॥ स्तंभनं लेखनं

नेत्र्यं विबंधाध्मानकारकं ॥ अथ सिंबि सिंबा ॥ सिंबि सिंबी उक्ता सिंबि स्तथा पु
लक सिंबिका ॥ सिंबी द्वयं तु मधुरं रसे पाके हिमं गुरु ॥ बल्यं दाहकरं प्रोक्तं श्लेष्म
लं वातपित्तजित् ॥ अथ सुवर्णसौवि ॥ कोलसिंबिः कृस्नफला तथा पर्य्यंकपट्टिका
कोलसिंबिः समीरघ्नी गुर्वी रूक्षा कषायपित्तकृत् ॥ मुकाग्निसादकृद्ध्यारुचिविबंधद
विदुरः ॥ अथ सोहिजनफल ॥ सोभांजनफलं स्वादु कषायं कफपित्तनुत् ॥ शूलकु
ष्ठ क्षयश्वासगुल्महृद्दीपनं परं ॥ अथ भंटा ॥ वृंताकं स्त्री तु वार्त्ताकु र्भंटाकी भंटि
कापि च ॥ वृंताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलं ॥ ज्वरवातबलासघ्नं दीपनं
शुक्रलं लघु ॥ तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं लघु ॥ वृंताकं पित्तलं किंचिदंगा
रपरिपाचितं ॥ कफमेदोनिलामघ्नमत्यर्थं लघु दीपनं ॥ तदेव हि गुरु स्निग्धं स
तैललवणान्वितं ॥ अपरं श्वेतवृंताकं कुक्कुटांडसमं भवेत् ॥ तदर्शःसु विशेषे

णरुक्ते हीने च पूर्ववत् ॥ अथ टिंडिश ॥ टिंडिशो रोमशफलो मुनि [illegible] निर्मित
इत्यपि ॥ टिंडिशो रुचिकृद्दीपि तः श्लेष्मपहः स्मृतः सुशीतो वातलो रूक्षो मूत्रल
श्चाश्मरीहरः ॥ अथ पिंडार ॥ पिंडारं शीतलं वल्यं पित्तघ्नं रुविकारकम्
पाके लघु विशेषेण विषशांतिकरं स्मृतं ॥ अथ खरखसा ॥ कर्कोटकी पीत
पुष्पा महाजालीति चोच्यते ॥ कर्कोटी मलहृत्कुष्ठहृल्लासारुचिनाशिनी श्वा
सकासज्वरान्हंति कटुपाका च दीपनी ॥ अथ करकुरा ॥ डोडिके विषमुष्टिश्च
डोडीत्यपि तु मुष्टिका ॥ डोडिका पुष्टिदा वृष्या रुच्या वह्निप्रदा लघुः ॥ हंति पित्तक
फाश्मीन्क्रिमिगुल्मविषामयान् ॥ अथ कंटकारीफलं ॥ कंटकारीफलं ति
क्तं कटुकं दीपनं लघु ॥ रूक्षो श्वासकासघ्नं ज्वरानिलकफापहं ॥ अथ नाल
शाकं ॥ नमस्सर्षपनाले ॥ ती सार्षपनालं वातश्लेष्मव्रणापहं ॥ केर्कि

मिहरं दद्रुकुष्ठघ्नं रुचिकारकं॥ अथ कंदशाकानि॥ तत्र सूरणनामानि गुणाश्च॥ सूरणः
कंदलं त्वर्शघ्नकंदलोऽर्शोघ्न इत्यपि॥ सूरणो दीपनो रूक्षः कषायः कंडुकृत्कटुः॥ विष्टंभी विश
दो रुच्यः कफार्शःकृंतनो लघुः॥ विशेषादर्शसे पथ्यः प्लीहगुल्मविनाशनः॥ सर्वेषां कंदशा
कानां सूरणः श्रेष्ठ उच्यते॥ दद्रूणां रक्तपित्तानां कुष्ठानां न हितो हि सः॥ संधानयोगं संप्राप्तः
सूरणो गुणवत्तरः॥ अथ आलू॥ आलूकं मध्यालूकं तत्कथितं वीरसेन च॥ काष्ठालु
कं शंखालुकं हस्त्यालूकानि कथ्यंते॥ पिंडालुकं मध्वालुकं रक्तालुकानि चोक्तानि॥ काष्ठा
लुकं काष्ठिन्यपुके कठास्य॥ शंखालुके स्वेनताम्रुकं शंखालू॥ हस्त्यालुकं दीर्घतायुक्तम
त्युरीरं॥ पिंडालुकं वर्तुलं॥ सुषवी॥ मध्वालुकं रोगान्वितं॥ दीर्घसुषवी॥ रक्तालू र
क्तारूरतेडाशत्तिच॥ आलुकं शीतलं सर्वं विष्टंभि मधुरं गुरु॥ सृष्टमूत्रमलं रूक्षं दुर्जरं
रक्तपित्तनुत्॥ कफानिलकरं बल्यं वृष्यं स्तन्यविवर्द्धनं॥ अथ अलुभेदा॥ रक्तालुभेदो यादी
र्घतन्वी च प्रथिता लुकी॥ आलुकी बलकृत्स्निग्धा गुर्वी हृत्कफनाशिनी॥ विष्टंभिकारि

णीतैलेनतलितं तु रुचिप्रदा ॥ अथ छोटीमूरई नेवारमूरई ॥ मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमू-

त्न मूलकं ॥ शा मर्कटकं विस्रं शालेयं मरुसंभवं ॥ चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका ॥ ने

पालमूलकपोतिका ॥ नेपालमूलकं चान्यत्तद्भवेद्गजदंतवत् ॥ लघुमूलकमुष्णं स्याद्रुच्यं लघुच

पाचनम् ॥ दोषत्रयहरं स्वर्यं ज्वरश्वासविनाशनं ॥ नासिकाकंठरोगघ्नं नयनामयनाशनं ॥ अथ

गाजर ॥ गाजरं गृंजनं प्रोक्तं तथा नारंगवर्णकं ॥ गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु ॥ सं

ग्राहि रक्तपित्तार्शोग्रहणीकफवातजित् ॥ अथ केराकंद ॥ शीतलः कदलीकंदो वल्यः केश्योऽम्ल

हा पित्तजित् ॥ वह्निकृद्दाहहारी च मधुरो रुचिकारकः ॥ अथ मानकंद ॥ मानकः स्यान्महापत्रः कथ्य

तेतद्गुणाः ॥ अथ मानकः शोथहृच्छीतः पित्तरक्तहरो लघुः ॥ अथ वाराहीकंद ॥ जेठी इति लोके ॥ वारा

हीपित्तला बल्या कटुस्तिक्ता रसायनी ॥ आयुष्काग्निकृन्मेहकफकुष्ठानिलापहा ॥ अथ हस्तिक

न ॥ गजपर्णी तु तिक्तोष्णा तथा वातकफान् जयेत् ॥ शीतज्वरहरी स्वादुः पाके तस्यास्तु कंदकः पांडु-

शोफक्रिमिप्लीहगुल्मानाहोदराणि च ॥ ग्रहण्यर्शोविकारघ्नो वर्तीस्म्रणकंदवत् ॥ अथ केमुक.

केउग्रौं इति लोके॥ केमुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु॥ दीपनं पाचनं रुच्यं कफपित्तज्वरापहं
कुष्टकासप्रमेहास्रनाशनं वातलं कटु॥ अथ कसेरुविचारः॥ कसेरु द्विविधं तत्तु महद्राज
कसेरुकम्॥ मुस्ताकृति लघु स्यात्तु यच्चोटमिति स्मृतं॥ कसेरुकद्वयं शीतं मधुरं तुवरं गुरु
पित्तशोणितदाहघ्नं नयनामयनाशनं॥ ग्राहि शुक्रानिलश्लेष्मरुचिस्तन्यकरं स्मृतं॥ अथ से
रकी भसीडे॥ पद्मादिकंदः शालूकं करहाटश्च कथ्यते॥ मृणालमूलं भिंसांडं लजालूकं च
कथ्यते॥ शालूकं शीतलं वृष्यं पित्तदाहास्रनुद्गुरु॥ दुर्जरं स्वादुपाकं च स्तन्यानिलकफप्रदम्
संग्राहि मधुरं रूक्षं भिसांडमपि तद्गुणं॥ अथ संस्वेदजशाकानि॥ तेषां नामानि गुणाश्च॥ छत्रकं
संस्वेदजं शाकं भूमिछत्रं शिलीध्रकं॥ दितिगोमयकाष्ठे कुवल्मादिषु तद्भवेत्॥ सर्वे संस्वे
दजाः शीता दोषलाः पिच्छिलाश्च ते॥ गुरवश्छर्द्यतीसारज्वरश्लेष्मामयप्रदाः॥ श्वेताः शुचि
स्थलीकाष्ठवंशगोव्रजसंभवाः॥ नातिदोषकरास्ते स्युः शेषास्तेभ्यो विगर्हिताः॥ संस्वेदजा छ
त्राइति लोके॥ इति श्रीभावप्रकाशे शाकवर्गः॥ अथ मांसवर्गः॥ तत्र मांसस्य नामानि गु

णाश्च॥ मांसं तु पिशितं क्रव्यमामिषं पललं पलं॥ मांसं वातहरं सर्वं बृंहणं बलपुष्टिकृत्॥
प्रीणनं गुरु हृद्यं मधुरं रसपाकयोः॥ अथ तद्भेदाः॥ मांसवर्गो द्विधा तेषो जांगलानूपभे
दतः॥ तत्र जांगलस्य लक्षणं गुणाश्च॥ मांसवर्गेऽत्र जंघालाबिलस्थाश्च गुहाशयाः॥
तथा पर्णमृगाज्ञेया विष्किराः प्रतुदा अपि॥ प्रसहाश्चाथ वग्राम्याश्चाष्टौ जांगलजातयः
जांगला मधुरा रूक्षास्तुवरा लघवस्तथा॥ बल्यास्ते बृंहणा वृष्या दीपना दोषहारिणः॥
मूकतां मिन्मिनत्वं च गद्गदत्वार्दिते तथा॥ बाधिर्यमरुचिं छर्दिं प्रमेहं मुखजान् गदान्
श्लीपदं गलगंडं च नाशयंत्यनिलामयान्॥ अथानूपस्य लक्षणं गुणाश्च॥ कूलेचराः प्लवा
श्चापि कोशस्थाः पादिनस्तथा॥ मत्स्या एते समाख्याताः पंचधानूपजातयः॥ आनूपा मधुराः
स्निग्धाः गुरवो वह्निसादनाः॥ श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम्॥ तथाभिष्यं
दिनस्ते हि प्रायोऽपथ्यतमाः स्मृताः॥ अथ जांगलानां गणानां विशिष्टगुणाश्च॥ हरिणो

घा =

नकुरंगाः पृषतन्येकसंवराः॥ राजीवोपिचमुंडीचेत्याद्याजंघालसंज्ञकाः॥ हरिणस्ता
म्रवर्णः स्यादेनः कृष्णः प्रकीर्तितः॥ कुरंगईषत्ताम्रः स्याद्धेनुवत्स्याकृतिर्मतान्॥ ऋष्यो
फ३ नीलांडकोलोकेमरो इतिकीर्तितः॥ पृषतश्च ह्रविंदुः स्याद्धरिणात्किंचिदल्पकः॥ न्य न३
कुर्वृहद्विषाणोयसंवरोगवयोमतान्॥ राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः॥ यो
मृगः श्रृंगहीनः स्यान्मुंडीतिनिगद्यते॥ जंघालाः प्रायशः सर्वे पित्तश्लेष्महराः स्मृताः
किंचिद्वातकराश्चापि लघवो बलवर्द्धनाः॥ अथ [illegible] विलेशयानां गुणनामगुणा
श्च॥ गोधाशशभुजंगाखुशल्लकाद्या बिलेशयाः॥ बिलेशया वातहरा मधुरारसपा
कयोः॥ वृंहणा बद्धविण्मूत्रा वीर्योष्णाश्च प्रकीर्तिताः॥ अथ गुहाशयानां नामगु
णाश्च॥ सिंहव्याघ्रवृकाऋक्षतरक्षुद्वीपिनस्तथा॥ बभ्रुजंबुकमार्जारा इत्याद्याः स्यु
र्गुहाशयाः॥ तरक्षुः रुड्हाइतिलोके॥ द्वीपी चित्रव्याघ्र इतिलोके॥ स्थूलपृष्ठो रक्त

नेत्रो वभ्रुर्मेदःस्ननाकुलाः गुरुराश्रया वालकरा गुरुस्तामधुराश्च ते॥ स्निग्धा बल्या हिता नित्यं नेत्र
ग्रह्यविकारिणां॥ अथ पर्णमृगाणां नामानि गुणाश्च॥ वनौको वृक्षमार्जार वृक्षमर्कटिकाद
याः॥ एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः॥ वनौका वानरः वृक्षमार्जारो वृक्षविडालः॥
वृक्षमर्कटिका रूखीइति लोके॥ स्मृताः पर्णमृगा वृष्याः चक्षुष्याः शोषिणे हिताः॥ श्वासार्शः
कासशमनाः सृष्टमूत्रपुरीषकाः॥ अथ विष्किराणां नामानि गुणाश्च॥ वर्तका लाववर्तीरक
पिंजलकतित्तिराः॥ कुलिंगकुक्कुटाद्याश्च विष्किराः समुदाहृताः॥ विकीर्य भक्षयंत्येते यस्मा
त्तस्माद्धि विष्किराः॥ कपिंजल इति प्रोक्तो गौरतित्तिरः॥ कुलिंगमनवे प्राइतिलो
के विष्किरा मधुराः शीताः कषायः कटुपाकिनः॥ बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृ ग:
ताः॥ अथ प्रतुदानां नामानि गुणाश्च॥ हारीतो धवलः पांडुश्चित्रपत्रो वृहच्छुकः॥ पारावतः
खंजरीटः [illegible]पिकाद्याः प्रतुदाः स्मृताः॥ प्रतुद्य भक्षयंत्येते तुंडेन प्रतुदास्ततः॥ हारीतः हा
रिल इति लोके॥ कपोतो धवलः पांडुः शातपत्रो वृहच्छुकः॥ दार्वाघाट इत्यमरः॥ दार्वाघाटः

१८४

कठफोरवा इति लोके॥ प्रतुदा मधुरा पित्तकफघ्नास्तुवराहिमाः॥ लघवो बद्धवर्चस्काः किंचिद्वा
तकराः स्मृताः॥ अथ प्रसहानां गणनागुणाश्च॥ काकोगृध्र उल्लूकश्चिल्लश्च शशघातकः॥
चाषो भासश्च कुररइत्याद्याः प्रसहाः स्मृताः॥ शशघातकः बाज इति लोके॥ चाषः नीलकंठ
इति लोके॥ भासो गृध्रविशेषः स्यात् कुररः कराकुर इति लोके॥ प्रसहाः कीर्तिता एते प्रसह्याच्छि
द्य भक्षणात्॥ प्रसहाः खलु वीर्योष्णास्तन्मांसं भक्षयंति ये॥ ते शोषभस्मकोन्मादेः शुक्रक्षीणाभ
वंति हि॥ अथ ग्राम्याणां गणनागुणाश्च॥ छागमेषवृषस्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः॥ ग्रा
म्या वातहराः सर्वे दीपनाः कफपित्तलाः॥ मधुरा रसपाकाभ्यां बृंहणा बलवर्द्धनाः॥ अथानूप
जंतवः॥ तत्र कूलेचराणां गणनागुणाश्च॥ लुलायगंडवाराहचमरीवारणादयः॥ एते कू
लेचराः प्रोक्ता यतः कूले चरंत्यमी॥ लुलायो महिषः॥ गंडः गैंडा॥ चमरी चमरपुच्छी गौः
वारणः हस्ती॥ कूलेचरा मरुत्पित्तहरा वृष्या बलावहाः॥ मधुराः शीतलाः स्निग्धा मूत्रलाः
श्लेष्मवर्द्धनाः॥ अथ प्लवानां गणनागुणाश्च॥ हंससारसकादंबबककौंचशरारिकाः

नंदीमुखीसकादेवावलाकाद्याः प्लवाः स्मृताः॥ प्लवंतिसलिलेयस्मादेतेतस्मात्प्लवाः स्मृताः
कारंजःकपर्दिकादौ रक्तहृकः॥ क्रौंचः घारद्विंगः स्यात् टेंकइतिलोके॥ शारिका सिंधुइ
ति॥ स्थूलाकठोरावक्ता वयस्याश्चाप्युपरि स्थिता॥ त्रुटिकाजंबुसहृशी प्रोक्ता नंदीमुखीतिसा
कादंवः करंवाइतिलोके॥ वलाका वगुलीइतिलोके॥ प्लवाः पित्तहराः स्निग्धामधुगुरवो
हिमाश्चतेवातश्लेष्मप्रदाश्चापि वलमुक्रकराः सराः॥ अथकोशस्थानां गणनागुणाश्च॥
शंखः शंखनखश्चापि शुक्तिः शंबूककर्कटाः॥ जीवाएवंविधाश्चान्ये कोशस्थाः परिकीर्ति
र्तिताः॥ शंखनखं तु क्षुद्रशंखः॥ कोशस्था मधुराः स्निग्धा वातपित्तहरा हिमाः॥ वृंहणावृष्यवर्द्ध
स्कावृष्याश्च वलवर्द्धनाः॥ अथपादिनां गणनागुणाश्च॥ कुंभीरकूर्मनक्राश्च गोधामकरशंक
वः॥ घंटिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः॥ कुंभीरो मारको जलजंतुः॥ कूर्मः कच्छपः॥
नक्रः नाकइतिलोके॥ शरव्वादिनदीषु वर्तुलः॥ गोधा गोहिलजंतुः॥ मकरः मगरइतिलोके॥
शंकुच इतिलोके॥ घंटिका घरिआरइतिलोके॥ शिशुमारः सोंसइतिलोके॥ पादिनोपिच

वरहसिंगा॥ न्यंकुः स्वादुर्लघुर्बल्यो वृष्यो दोषत्रयापहः॥ अथ सांवर॥ सांवरं पललं स्नि
ग्धं शीतलं गुरु च स्मृतं॥ रसे पाके च मधुरं कफदं रक्तपित्तहृत्॥ अथ राजीव॥ राजीवस्तु
गोर्ज्ञेयः पृषतेन समो गुणैः॥ अथ पाढी॥ मुंडी तु ज्वरकासास्रक्षयश्वासापहो हिमः॥ अथ
विलेशयेषु॥ तत्र शशस्य॥ लंबकर्णः शशः शूली लोमकर्णो विलेशयः॥ शशः शीतो ल
घुर्ग्राही रूक्षः स्वादुः सदा हितः॥ वह्निकृत्कफपित्तघ्नो वातसाधारणः स्मृतः॥ ज्वरातीसार
शोषास्रश्वासामयहरः शशः॥ अथ सलकी॥ सेधा तु शल्यकः श्वावित्कथ्यंते तद्गुणा॥ अथ
शल्यकः श्वासकासास्रशोषदोषत्रयापहः॥ अथ पक्षिणां नामानि गुणाश्च॥ पक्षी खगो
विहंगश्च विहगश्च विहंगमः॥ शकुनिर्विस्तथा पत्री विष्किरो वि[illegible]क ऊजः॥ धान्यांकुर रो
चयाये त्रतेषां मांसं लघूत्तमं॥ आनूपे बलकृन्मांसं स्निग्धं गुरुतरं स्मृतं॥ तेषु विष्किरेषु व
टेरं वदे॥ वर्तीको वर्तकश्चित्रस्तनोत्पावर्तकाः स्मृताः॥ वर्तकोऽग्निकरः शीतो ज्वरदोषत्रयाप
हः सरुच्यः शुक्रदो बल्यो वर्तकाल्पगुणस्ततः॥ अथ लावा॥ लावा विष्किरवर्गेऽस्मास्ते चतु

१८६

धीमता बुधैः॥ पांसुलो गोरवो न्यस्तु पौण्ड्रको दर्भरस्तथा॥ लावा वह्निकराः स्निग्धा ज्वरघ्ना ग्रा
हिणो हिमाः॥ पांसुलः श्लेष्मलस्तेषु वीर्योष्णोऽनिलनाशनः॥ गोरो लघुतरो रूक्षो वह्निकारी
त्रिदोषजित्॥ पौण्ड्रकः पित्तकृत्किंचिद्बृंहणो वातकफापहः॥ दर्भरो रक्तपित्तघ्नो हृद्यामयहरो
हिमः॥ अथ वर्तीरा॥ वर्तीरो वातचटको वर्तीकोपि च सस्मृतः॥ वर्तीको मधुरः शीतो रूक्षः
श्वकफपित्तजित्॥ अथ कृष्णतित्तिरि गोरतित्तिरि॥ तित्तिरिः कृष्णवर्णः स्यात्स्तु गोरः कपि
ञ्जलः॥ तित्तिरिर्बलदो ग्राही हिक्कादोषत्रयापहः॥ श्वासकासज्वरहरस्तस्माद्गोरोऽधिको गु
णैः॥ अथ गरवैश्मा॥ चटकः क लविंकः स्यात्कुलिंगः कालकंटकः॥ कुलिंगः शीतलः स्नि
ग्धः स्वादुः शुक्रकफप्रदः॥ सन्निपातहरो वेश्मचटकश्चाति शुक्रलः॥ अथ कुक्कुट॰ वनकु
क्कुट॥ कुक्कुटः कृकवाकुः स्यात्कालज्ञश्चरणायुधः॥ ताम्रचूडस्तथा दक्षो यामनादी शिखं
डिकः॥ कुक्कुटो बृंहणः स्निग्धो वीर्योष्णोऽनिलहृद्गुरुः॥ चक्षुष्यः शुक्रकफकृद्बल्यो वृष्यः क
षायकः॥ आरण्यकुक्कुटः स्निग्धो बृंहणः श्लेष्मलो गुरुः॥ वातपित्तक्षयवमिविषमज्वरना

यानः॥ अथ प्रनुदेशहारीतस्य॥ हारीतो रक्तपीतः स्याद्धरितो पि स कथ्यते॥ हारीतः हा
रिल इति लोके॥ हारीतो रूक्ष उष्णश्च रक्तपित्तकफापहः॥ स्वेदस्वरकरः प्रोक्त ईषद्वात
करस्मृतः॥ अथ पांडु॥ धवलपांडु॥ पांडुस्तु द्विविधो ज्ञेयश्चित्रपक्षः कलिध्वनिः॥ द्विती
यो धवलः प्रोक्तः स कपोतस्फुटस्वनः॥ [illegible] चित्रपक्षः इति लोके॥ चित्रपक्षः कफ
हरो वातघ्नो ग्राहिणि प्रणात॥ धवलः पांडुरुद्दिष्टो रक्तपित्तहरो हिमः॥ रसे पाके च मधुरः
संग्राही वातशांतिकृत्॥ अथ पारेवा॥ पारावतः कलरवः कपोतो रक्तलोचनः॥ पाराव
तो गुरुः स्निग्धो रक्तपित्तानिलापहः॥ संग्राही शीतलस्तज्ज्ञैः कथितो वीर्यवर्द्धनः॥ अथ
पक्ष्यंडस्य गुणाः॥ नातिस्निग्धानि रूक्षाणि स्वादुपाकरसानि च॥ वातघ्नान्यतिशुक्रा
णि गुरूण्यंडजानि पक्षिणां॥ अथ ग्राम्येषु छागस्य॥ छागलो वर्करश्छागो वस्तोऽजश्छेलकस्तु
भः॥ अजा छागीस्तुभा चापि छोलिका चगलस्तनी॥ छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदो
षनुत्॥ नातिशीतमदाहि स्यात्स्वादु पीनसनाशनं॥ परं बलकरं रुच्यं बृंहणं वीर्य्यवर्द्धनं॥

चित्रं
रोगा ४

॥अजाया अप्रसूताया मांसं पीनसनाशनं॥ शुष्ककासे रुचौ शोषे हितमग्नेश्च दीपनम्॥
अजासुतस्य बालस्य मांसं लघुतरं स्मृतं॥ हृद्यं ज्वरहरं श्रेष्ठं सुखदं बलदं परं॥ मांसं नि
ष्काशिताण्डस्य छागस्य कफकृद्गुरु॥ स्रोतःशुद्धिकरं बल्यं मांसदं वातपित्तनुत्॥ वृद्ध
स्य वातलं रूक्षं तथा व्याधिमृतस्य च॥ ऊर्द्ध्व विकारघ्नं छागमुण्डं रुचिप्रदं॥ अथ मेढ्रा
मेढ्रो मेढ्र उरभ्रो मेष उरणो ऽवि एडकोपि च॥ अविर्द्दृष्टि स्तयोर्ण्णायुः कथ्यते तद्गुणा॥ अथ
मेषस्य मांसं तु स्निग्धं स्यात्पित्तश्लेष्मकरं गुरु॥ तस्यैवाण्डविहीनस्य मांसं किंचिल्लघु स्मृतं
॥ अथ राज्डिकादिविकादितिलोके॥ डुंवा हूमा॥ राज्डकः स्थूलपुच्छः स्यान्मेदःपुच्छस्तु दुंवकः
एडकस्य पलं ज्ञेयं मेषामिषसमं गुणैः॥ मेदःपुच्छोद्भवं मांसं हृद्यं वृष्यं श्रमापहं॥ पित्तश्ले
ष्मकरं किंचिद्धन्ति व्याधिविनाशनं॥ अथ वर्द्दगाय॥ बलीवर्द्दस्तु वृषभः ककुद्मान्भस्तथा
वृषः॥ अनड्वान्सौरभेयी च माहेयी गो ... दाहृता॥ गोमांसं तु गुरु स्निग्धं पित्तश्लेष्मविवर्द्ध
नं॥ वृष्यं वातहरं बल्यमपथ्यं पीनसं प्रणुत्॥ अथ घोरा॥ घोटकेवीति तुरगस्तुरंगाश्व

रु

॥ अजा या अप्रसूता या मांसं पीनसनाशनं ॥ शुष्ककासे रुचौ शोषे हितमग्निप्रदीपनम्
॥ अजासुतस्य बालस्य मांसं लघुतरं स्मृतं ॥ हृद्यं ज्वरहरं श्रेष्ठं सुखदं बलदं भृशं ॥ मांसं नि
ष्काशितांडस्य छागस्य कफकृद्गुरु ॥ स्रोतःशुद्धिकरं बल्यं मांसं दं वातपित्तनुत् ॥ वृद्ध
स्य बालस्य रूढं तथा व्याधिमृतस्य च ॥ ऊर्ध्वजत्रुविकारघ्नं छागमुंडं रुचिप्रदं ॥ अथ मेषा
मेढ्रो मेढ्रो रुजो मेषस्तु ऊरणो येडको पि च ॥ अविर्वृष्णिस्तथोर्णायुः कथ्यते तद्गुणाः ॥ अथ
मेषस्य मांसं पुष्टस्य स्यात् पित्तश्लेष्मकरं गुरु ॥ तस्येवांडविहीनस्य मांसं किंचिल्लघु स्मृतं
॥ अथ एडकाः विकाइ तिलोके ॥ डेंवा हूमा ॥ एडकः स्थूलशृंगः स्यान्मेदः पुच्छस्तु दुंबकः
एडकस्य पलं ज्ञेयं मेषामिषसमं गुणैः ॥ मेदःपुच्छोद्भवं मांसं हृद्यं वृष्यं श्रमापहं ॥ पित्तश्ले
ष्मकरं किंचिद्धतव्याधिविनाशनं ॥ अथ बलद्र गाय ॥ बलीवर्दस्तु वृषभ ऋषभश्च तथा
वृषः ॥ अनड्वान् सौरभेयी च माहेयी गौ दाहृता ॥ गोमांसं तु गुरु स्निग्धं पित्तश्लेष्मविवर्द्ध
नं ॥ बृंहणं वातहृद्बल्यमपथ्यं पीनसप्रणुत् ॥ अथ घोरा ॥ घोटके वीति तुरगतुरंगाश्व

॥ अजाया अप्रसूताया मांसं पीनसनाशनं ॥ शुष्ककासेरुचौ शोषे हितमग्नेश्च दीपनम्
॥ अजासुतस्य बालस्य मांसं लघुतरं स्मृतं ॥ हृद्यं ज्वरहरं श्रेष्ठं सुखदं बलदं भृशं ॥ मांसं नि
ष्काशितांडस्य छागस्य कफकृद्गुरु ॥ स्रोतःशुद्धिकरं बल्यं मांसं तद्वातपित्तनुत् ॥ वृद्ध
स्य बालस्य हृद्यं तया व्याधिमृतस्य च ॥ ऊर्द्ध्वजत्रुविकारघ्नं छागमुंडं रुचिप्रदं ॥ अथ मेढ्रा
मेढ्रो मेढ्रो वृष्णो मेष उरणो ऽवेडको ऽपि च ॥ अविर्हुडिस्तथोर्णायुः कथ्यते तद्गुणाः ॥ अथ
मेषस्य मांसं पुष्टं स्यात्पित्तश्लेष्मकरं गुरु ॥ तस्यैवांडविहीनस्य मांसं किंचिल्लघु स्मृतं
॥ अथ एडिकाइं विकाइ तिलोके ॥ डेवा हूमा ॥ एडकः स्थूलशृंगः स्यान्मेदःपुच्छस्तु दुंबकः
एडकस्य पलं ज्ञेयं मेषामिषसमं गुणैः ॥ मेदःपुच्छोद्भवं मांसं हृद्यं वृष्यं श्रमापहं ॥ पित्तश्ले
ष्मकरं किंचिद्वातव्याधिविनाशनं ॥ अथ बर्द गाय ॥ बलीवर्दस्तु वृषभ ऋषभस्तथा
वृषः ॥ अनड्वान्सौरभेयी च माहेयी गौ॰ दा स्मृता ॥ गोमांसं तु गुरु स्निग्धं पित्तश्लेष्मविवर्द्ध
नं ॥ वृष्यं वातहरं बल्यमपथ्यं पीनसं मृगात् ॥ अथ घोरा ॥ घोटके वीति तुरग तुरंगाश्व